# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ८७

तस्यां रजन्यां व्युष्टायां यज्ञवाटगतो नृपः ।
ऋषीन्सर्वान्महातेजाः शब्दापयति राघवः ॥ १॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ।
विश्वामित्रो दीर्घतपा दुर्वासाश्च महातपाः ॥ २॥

अगस्त्योऽथ तथाशक्तिर्भार्गवश्चैव वामनः ।
मार्कण्डेयश्च दीर्घायुर्मौद्गल्यश्च महातपाः ॥ ३॥

भार्गवश्च्यवनश्चैव शतानन्दश् च धर्मवित् ।
भरद्वाजश्च तेजस्वी अग्निपुत्रश्च सुप्रभः ॥ ४॥

एते चान्ये च मुनयो बहवः संशितव्रताः ।
राजानश्च नरव्याघ्राः सर्व एव समागताः ॥ ५॥

राक्षसाश्च महावीर्या वानराश्च महाबलाः ।
समाजग्मुर्महात्मानः सर्व एव कुतूहलात् ॥ ६॥

क्षत्रियाश्चैव वैश्याश्च शूद्राश्चैव सहस्रशः ।
सीताशपथवीक्षार्थं सर्व एव समागताः ॥ ७॥

तथा समागतं सर्वमश्वभूतमिवाचलम् ।
श्रुत्वा मुनिवरस्तूर्णं ससीतः समुपागमत् ॥ ८॥

तमृषिं पृष्ठतः सीता सान्वगच्छदवाङ्मुखी ।
कृताञ्जलिर्बाष्पगला कृत्वा रामं मनोगतम् ॥ ९॥

तां दृष्ट्वा श्रीमिवायान्तीं ब्रह्माणमनुगामिनीम् ।
वाल्मीकेः पृष्ठतः सीतां साधुकारो महानभूत् ॥ १०॥

ततो हलहला शब्दः सर्वेषामेवमाबभौ ।
दुःखजेन विशालेन शोकेनाकुलितात्मनाम् ॥ ११॥

साधु सीतेति के चित्तु साधु रामेति चापरे ।
उभावेव तु तत्रान्ये साधु साध्विति चाब्रुवन् ॥ १२॥

ततो मध्यं जनौघानां प्रविश्य मुनिपुङ्गवः ।
सीतासहायो वाल्मीकिरिति होवाच राघवम् ॥ १३॥

इयं दाशरथे सीता सुव्रता धर्मचारिणी ।
अपापा ते परित्यक्ता ममाश्रमसमीपतः ॥ १४॥

लोकापवादभीतस्य तव राम महाव्रत ।
प्रत्ययं दास्यते सीता तामनुज्ञातुमर्हसि ॥ १५॥

इमौ च जानकी पुत्रावुभौ च यमजातकौ ।
सुतौ तवैव दुर्धर्षो सत्यमेतद्ब्रवीमि ते ॥ १६॥

प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन ।
न स्मराम्यनृतं वाक्यं तथेमौ तव पुत्रकौ ॥ १७॥

बहुवर्षसहस्राणि तपश्चर्या मया कृता ।
तस्याः फलमुपाश्नीयामपापा मैथिली यथा ॥ १८॥

अहं पञ्चसु भूतेषु मनःषष्ठेषु राघव ।
विचिन्त्य सीतां शुद्धेति न्यगृह्णां वननिर्झरे ॥ १९॥

इयं शुद्धसमाचारा अपापा पतिदेवता ।
लोकापवादभीतस्य दास्यति प्रत्ययं तव ॥ २०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com